**दिनाङ्कः 29.03.2026**
**प्रातः - 06:55**

**इयम् आकाशवाणी**
**सम्प्रति वार्ताः श्रूयन्ताम्**
**प्रवाचिका – निधि झा**

**अथ वार्ताः**

**मन की बात**

अद्य प्रातः एकादश वादने प्रधानमन्त्री नरेन्द्रमोदी आकाशवाण्या मन की बात इति कार्यक्रमावधौ स्वीयं मनोगतं देशस्य विदेशस्य च जनैः समं विनिमयीकरिष्यति।

अयं हि अस्य लोकप्रिय-कार्यक्रमस्य द्वात्रिंशदधिकैकशततमो भागो भविष्यति। अस्य प्रसारणम् आकाशवाण्याः दूरदर्शनस्य च सर्वेषु केन्द्रेषु, 'ए.आई.आर. न्यूज़' अन्तर्जालपुटे तथैव 'न्यूज़-ऑन-ए आई आर' दूरभाष-तन्त्रांशे भविष्यति। अपि च, प्रधानमन्त्रि-कार्यालयस्य (PMO) सूचना-प्रसारण-मन्त्रालयस्य च 'यूट्यूब' वाहिन्याम् अपि एषः कार्यक्रमः साक्षात् प्रसारितो भविष्यति। हिन्दी-प्रसारणानन्तरं आकाशवाणी प्रादेशिक-भाषासु अपि कार्यक्रममिदं अनूद्य प्रसारयिष्यति।

**प्रधानमन्त्री-विमानपत्तनम्**

सर्वकारः विकसित-भारतस्य निर्माणार्थं आधुनिक-आधारभूत-संरचनासु अभूतपूर्व-निवेशं करोतीति प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिपादितम्। गौतमबुद्धनगर-जनपदस्य जेवर-क्षेत्रे नोएडा-अन्ताराष्ट्रिय-विमानपत्तनस्य प्रथम-चरणीयोद्घाटनं विधाय श्रीमोदिना निगदितं यत् विगतैकादश-वर्षेषु आधारभूत-संरचनायाः आयव्ययकं षड्गुणाधिकं प्रवर्धितम्। रेलवे-विद्युतीकरणस्य विषये प्रधानमन्त्रिणा सूचितं यत् चतुर्दशाधिक-द्विसहस्रतमात् वर्षात् पूर्वं विंशति- सहस्र-किलोमीटर-परिमितं आसीत्, तत् अधुना चत्वारिशंत् सहस्र-किलोमीटर-मितादधिकं सञ्जातम्। साम्प्रतं प्रायः शतप्रतिशतं ब्रॉड-गेज़-सञ्जालस्य विद्युतीकरणं पूर्णं अभवत्।

प्रधानमन्त्रिणा विशेषतः उल्लेखितं यत् प्रथमवारं कश्मीर-उपत्यका तथा च उत्तर-पूर्व-राज्याणां राजधान्यः रेल-सञ्जालस्य माध्यमेन संबद्धाः भवन्ति। विगतैकदशके जलपोताश्रय-क्षमता द्विगुणाधिकं प्रवर्धिता, अन्तर्देशीय-जलमार्गाणां संख्या च निरन्तरं वर्धमाना अस्ति।

श्रीमोदिना प्रोक्तं यत् पश्चिम-एशिया-क्षेत्रे विगत-मासतः प्रवृत्त-युद्धेन बहवः देशाः खाद्य-पदार्थानां, तैलस्य, वातेन्धनस्य, उर्वरकाणां अभावं सम्मुखीकुर्वन्ति । श्रीमोदिना प्रतिपादितं यत् यद्यपि विश्वस्य प्रत्येकोऽपि देशः अनेन सङ्कटेन सह युध्यते, तथापि भारतं स्व-नागरिकाणां सामर्थ्येन पूर्ण-शक्त्या अस्य सङ्कटस्य प्रतिकारार्थं सज्जो वर्तते ।

**पश्चिम-एशिया-सङ्घर्षः: रक्षामन्त्रिणः अध्यक्षतायां उच्चस्तरीयं उपवेशनम्**

रक्षामन्त्री राजनाथ सिंहः पश्चिम-एशिया-क्षेत्रस्य परिवर्तनशीलां स्थितिं अवलोक्य सक्रिय-समन्वित-दूरगामी-दृष्टिकोणस्य आवश्यकतायां बलम् अददात्। तेनोदीरितं यत् वर्तमाने सङ्कटकाले अस्माकं सतर्कता अतीव आवश्यकी अस्ति। अस्मिन् उपवेशने वित्तमन्त्री निर्मला सीतारमण, पेट्रोलियम-मन्त्री हरदीप सिंह पुरी, स्वास्थ्यमन्त्री जे.पी. नड्डा, जितेन्द्र सिंहः तथा के.

राममोहन नायडू सदृशाः प्रमुखाः मन्त्रिणः उपस्थिताः आसन्।
रक्षामन्त्रिणा सूचितं यत् अस्मिन् उपवेशने ऊर्जा-आपूर्ति-सङ्कटस्य, जीवनावश्यक-वस्तूनां उपलब्धतायाः, महत्त्वपूर्ण-आधारभूत-संरचनायाः सुरक्षायाः तथा भारतस्य आपूर्ति-शृङ्खलायाः सुदृढतायाः विषये विस्तरेण समीक्षा कृता।

**भारत ट्राइब्स' महोत्सवस्य विस्तारः**

जनसामान्यस्य अभूतपूर्वप्रतिक्रियया भारत-सर्वकारेण 'भारत ट्राइब्स' महोत्सवः आगामी-मासस्य पंच दिनाङ्क-पर्यन्तं विस्तारितः। जनजातीय-कार्य-मन्त्रालयानुसारं एतस्य निर्णयस्य मुख्य-उद्देश्यं जनजातीय-शिल्पिनां, उद्यमिनां तथा 'स्वयं-सहायता-समूहानां' कृते आपण-प्रवेशं जीविकोपार्जनस्य अवसरान् च अधिकं सुदृढं करणम् अस्ति। विस्तारित-कार्यक्रमावधौ अद्य नवदेहल्यां 'वन-धन-सम्मेलनम्' आयोक्ष्यते। अस्य सम्मेलनस्य उद्घाटनं जनजातीय-कार्य-मन्त्री दुर्गादास उइके विधास्यति।

**खेलोइण्डियाजनजातीय-क्रीडा**

षडविंशत्युत्तर द्विसहस्रतमवर्षस्य 'खेलो इण्डिया जनजातीय-क्रीडायाः चतुर्थे दिवसे भारोत्तोलन-क्रीडायां निकिता सप्तसप्ततिः किलोग्राम-वर्गे स्वर्णपदकम् अवाप्तवती। तरण-प्रतिस्पर्धायाम् ओडिशा-राज्यम् प्रथमं स्थानं भजते। अरुणाचल-प्रदेशः अपि पुरुष-भारोत्तोलने द्वे स्वर्णपदके जित्वा पदक-तालिकायां तृतीयं-स्थानं भजते। अधुना कर्णाटक-राज्यम् पंचाशत् स्वर्णपदकैः सह तालिकायां शीर्षस्थाने अस्ति, सहैव ओडिशा-राज्यं द्वितीयस्थाने तथा छत्तीसगढ़-राज्यं सप्तमस्थाने विराजते।

**।। इति वार्ताः।।**